**आदर्शप्रश्नपत्रम्**

**संस्कृतव्याकरणम् (२४६) Sanskrit Vyakaranam (246)**

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 6, [C] भागे 6, [D] 5, [E] भागे 5 इति आहत्य 51 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् – वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

**[A] प्रश्नसङ्ख्या १-२० बहुविकल्पप्रश्नाः सन्ति येषां कृते २० अङ्काः आवंटिताः भवन्ति।**

**1x20=20**

१. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. कवर्गस्य उच्चारणस्थानं किम्।

(क) तालु (ख) मूर्धा (ग) कण्ठः (घ) दन्ताः।

**अथवा**

आ. जिह्वामूलीयस्य बाह्यप्रयत्नः कः।

(क) विवारः नादः घोषः च (ख) संवारः नादः घोषः च (ग) विवारः श्वासः अघोषः च (घ) संवारः श्वासः अघोषः च।

२. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. यकारस्य आभ्यन्तरप्रयत्नः कः।

(क) स्पृष्टः (ख) ईषत्स्पृष्टः (ग) विवृतः (घ) संवृतः।

**अथवा**

आ. ग्रहणकशास्त्रेण कीदृशः अण् सवर्णं बोधयति।
(क) विधीयमानः (ख) अविधीयमानः (ग) आगमः (घ) आदेशः।

३. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. "अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रे अप्रत्ययः इति शब्दस्य केन सह विशेषणविशेष्यभावः सम्बन्धः।
(क) अण् (ख) उदित् (ग) अण् उदित् (घ) सवर्णस्य।

**अथवा**

आ. उच्चारणस्थानम् आभ्यन्तरयत्नश्च ययोः वर्णयोः तुल्यं तयोः वर्णयोः का संज्ञा भवति।
(क) अननुनासिकः (ख) अनुस्वारः (ग) अनुनासिकः (घ) सवर्णः।

४. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1
अ. एषु किं निषेधसूत्रं नास्ति।
(क) तोः षि (ख) शात् (ग) खरि च (घ) न पदान्ताट्टोरनाम्।

**अथवा**

आ. कृष्णर्द्धिः इत्यत्र केन सूत्रेण सन्धिकार्यम्।
(क) इको यणचि (ख) आद् गुणः (ग) वृद्धिरेचि (घ) अकः सवर्णे दीर्घः।

५. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. "वृद्धिरेचि" इति सूत्रस्य किम् उदाहरणम्।

(क) गङ्गौघः (ख) अक्षौहिणी (ग) प्रेजते (घ) उपेधते।

**अथवा**

आ. "उपसर्गादृति धातौ" इति सूत्रस्य किम् उदाहरणम्।

(क) कृष्णैकत्वम् (ख) प्रार्च्छति (ग) सुखार्तः (घ) दशार्णम्।

६. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. रमा इत्यत्र सुप्रत्ययस्य लोपः केन सूत्रेण।

(क) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (ख) प्रत्ययलोपे प्रत्ययलक्षणम् (ग) अदर्शनं लोपः (घ) एङ्ह्रस्वात्सम्बुद्धेः।

**अथवा**

आ. रमे इत्यत्र शीप्रत्ययः केन सूत्रेण।

(क) औङ आपः (ख) जसः शी (ग) नपुंसकाच्च (घ) आङि चापः।

७. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. आप एकारः कदा भवति।

(क) आपि परतः (ख) शीप्रत्यये परे (ग) आङि (घ) सम्बुद्धौ।

**अथवा**

आ. आभ्याम् इत्यत्र अ इत्यस्य अदन्तत्वं केन।

(क) आद्यन्तवदेकस्मिन् (ख) नेदमदसोरकोः (ग) हलि लोपः (घ) अतो गुणे।

८. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. अयम् इत्यत्र मकारादेशः केन।

(क) इदमो मः (ख) नेदमदसोरकोः (ग) इदोऽय् पुंसि (घ) दश्च।

अथवा

आ. "याडापः" इति सूत्रे आपः इति कीदृशं पदम्।

(क) प्रथमाबहुवचनान्तम् (ख) पञ्चम्यकेवचनान्तम् (ग) षष्ठ्यकेवचनान्तम् (घ) द्वितीयाबहुवचनान्तम्।

९. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. मत्यै इत्यत्र नदीसंज्ञा केन सूत्रेण विधीयते।

(क) ङिति ह्रस्वश्च (ख) यू स्त्र्याख्यौ नदी (ग) नदीपौर्णमास्याग्रहायणीभ्यः (घ) आटश्च।

**अथवा**

आ. मत्याम् इत्यत्र आमादेशः केन सूत्रेण विधीयते।

(क) ङेराम्नद्याम्नीभ्यः (ख) इदुद्भ्याम् (ग) अम्बार्थनद्योर्ह्रस्वः (घ) आण्नद्याः।

१०. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1
पञ्चानाम् इत्यत्र उपधादीर्घविधायकं सूत्रं किम्।

(क) सर्वनामस्थाने चासम्बुद्धौ (ख) नोपधायाः (ग) अनिदितां हल उपधायाः क्ङिति (घ) अत उपधायाः।

**अथवा**

पथः इत्यत्र टेर्लोपः केन सूत्रेण।

(क) टेः (ख) यस्येति च (ग) भस्य टेर्लोपः (घ) थो न्थः।

११. इमम् इत्यत्र मकारादेशः केन सूत्रेण। 1
(क) दश्च (ख) अनाप्यकः (ग) हलि लोपः (घ) नेदमदसोरकोः।

१२. “अतो गुणे” इति सूत्रं कस्य अपवादभूतम्।
(क) अकः सवर्णे दीर्घः (ख) आद् गुणः (ग) सम्प्रसारणाच्च (घ) इको यणचि।

१३. "अम्बार्थनद्योर्ह्रस्वः" इति सूत्रस्य किम् उदाहरणम्। 1
(क) हे रमे (ख) हे गौरि (ग) मते (घ) फलम्।

१४. "साधकतमं करणम्" इति कीदृशं सूत्रम्? 1
(क) विधिसूत्रम् (ख) संज्ञासूत्रम् (ग) अतिदेशसूत्रम् (घ) अधिकारसूत्रम्।

१५. "कर्तृकर्मणोः कृति" इति सूत्रेण का विभक्तिः विधीयते? 1
(क) पञ्चमी (ख) षष्ठी (ग) सप्तमी (घ) चतुर्थी।

१६. “दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे” इति सूत्रं कीदृशम्? 1
(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) विधिसूत्रम् (घ) अधिकारसूत्रम्।

१७. धातुनिर्देशे कयोः प्रत्यययोः व्यवहारः? 1
(क) इक्श्तिपोः (ख) शतृशानचोः (ग) क्तक्तवत्वोः (घ) क्त्वाल्यपोः।

१८. “तौ सत्” इत्यत्र संज्ञापदं किम्? 1
(क) तौ (ख) सत् (ग) शतृशानचौ (घ) क्तक्तवतू।

१९. प्राट् इत्यत्र कस्य स्थाने क आदेशः? 1
(क) च्छ् इत्यस्य स्थाने ट् इत्यादेशः (ख) च्छ् इत्यस्य स्थाने श् इत्यादेशः

(ग) छ् इत्यस्य स्थाने श् इत्यादेशः (घ) छ् इत्यस्य स्थाने ट् इत्यादेशः।

२०. अभ्यस्तसंज्ञाविधायकं सूत्रं किम्? 1

(क) उभे अभ्यस्तम् इति (ख) आद् गुणः (ग) सम्प्रसारणाच्च (घ) इको यणचि।

**{B}** प्रश्नसङ्ख्या २१-३५ वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं ३० अङ्काः आवंटिताः भवन्ति । 2x15=30

**२१. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2**

अ. ऋत् संज्ञा चेत् संज्ञिनः ६ भवन्ति। (सत्यम्/ असत्यम्)

ब. सावर्ण्यविचारावसरे नासिकायाः उच्चारणस्थानस्य गणना न विधीयते। (सत्यम्/ असत्यम्)

स. "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति सूत्रे रूपशब्देन अर्थस्य ग्रहणम्। (सत्यम्/ असत्यम्)

द. "अचो यत्" इत्यत्र येन विधिस्तदन्तस्य सूत्रं प्रवर्तते। (सत्यम्/ असत्यम्)

२२. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

अ. पदद्वयं सप्तम्यन्तं तयोः एकम् अल्बोधकं चेत् तदन्तविधिः भवति। (सत्यम्/ असत्यम्)

ब.तत्कालस्य इत्यस्मिन् पदे बहुव्रीहिः समासः स्वीक्रियते। (सत्यम्/ असत्यम्)

स. तपरः इत्यस्मिन् पदे कर्मधारयः समासः स्वीक्रियते। (सत्यम्/ असत्यम्)

द."एकः पूर्वपरयोः" इत्यधिकारः "ख्यत्यात्परस्य" इति सूत्रात् प्राक् । (सत्यम्/ असत्यम्)

२३. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

अ. रामस् चेष्टते इत्यवस्थायां ससजुषो रुः सूत्रम् आदौ प्रवर्तते। (सत्यम्/ असत्यम्)

ब. झयो होऽन्यतरस्याम्" इति सूत्रस्य उत्थानम् उदाहरणम्। (सत्यम्/ असत्यम्)

स. वणिज् छात्रः इत्यवस्थायां खरि च सूत्रम् आदौ प्रवर्तते। (सत्यम्/ असत्यम्)

द. 'वा शरि' इति विधिसूत्रमिद अस्ति।(सत्यम्/ असत्यम्)

२४. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

अ. विसर्जनीयस्य सः' इति विधिसूत्रमिद अस्ति। (सत्यम्/ असत्यम्)

ब. झलां जशोऽन्ते इति विधिसूत्रमिद ना अस्ति। (सत्यम्/ असत्यम्)

स. 'शात्' इति निषेधसूत्रमिदम्। (सत्यम्/ असत्यम्)

द. 'न पदान्ताट्टोरनाम्' इति विधिसूत्रमिद अस्ति। (सत्यम्/ असत्यम्)

२५. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

अ. ङ्च्वि इति परिभाषासूत्रम्। (सत्यम्/असत्यम्)

ब.  अङ्गस्य इति अधिकारः द्वितीयाध्याये। (सत्यम्/असत्यम्)

स.  संयोगात् पूर्ववर्ती ह्रस्वस्वरः गुरुसंज्ञः भवति। (सत्यम्/असत्यम्)

२६. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । अधोलिखितेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

| | |
|---|---|
| अ. औङ आपः | (१) उदाहरणम् - हे रमे। |
| ब. सम्बुद्धौ च | (२) उदाहरणम्- रमे |
| स. आङि चापः | (३) उदाहरणम्- रमया। |
| द. याडापः | (४) उदाहरणम्- रमायै। |

२७. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । अधोलिखितेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 2

| | |
|---|---|
| अ. अतोऽम् | (१) ज्ञाने |
| ब. यस्येति च | (२) ज्ञानम् |
| स. सर्वनामस्थाने चासम्बुद्धौ | **(३)** ज्ञानानि। |
| द. इकोऽचि विभक्तौ | **(४) उदाहरणम्-** वारिणी। |

२८. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

अ. अभिप्रैति इत्यस्यार्थः सम्बद्धुम् इच्छति भवति। (सत्यम्/ असत्यम्)

आ. क्रोधशब्दस्य अर्थः अपकारः भवति। (सत्यम्/ असत्यम्)

२९. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

अ. सम्प्रदानम् अनुक्तं चेत् चतुर्थी विभक्तिः? (सत्यम्/ असत्यम्)

आ. ध्रुवम् इत्यस्यार्थः धातुवाच्यव्यापाराश्रयः भवति। (सत्यम्/ असत्यम्)

३०. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

अ. उपयोगशब्दस्य अर्थः नियमपूर्वकविद्यास्वीकारः भवति। (सत्यम्/ असत्यम्)

आ. माणवकः गुरोः वेदं पठति इत्यत्र गुरोः इत्यत्र अपादानसंज्ञा उपयोगे वक्तृत्वात् अत्र भवति। (सत्यम्/ असत्यम्)

३१. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

अ.देवदत्ताय हितं भूयात् इति 'कर्तृकर्मणोः कृति' सूत्रस्य उदाहरणम्। । (सत्यम्/ असत्यम्)

आ. "आयुक्तकुशलाभ्यां चासेवायाम्" इति सूत्रस्य कुशलः हरिपूजनस्य इति उदाहरणम् अस्ति।

(सत्यम्/ असत्यम्)

३२. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 2

अ. स्योनः इत्यत्र व् इत्यस्य स्थाने ऊठ् इत्यादेशः आदेशः भवति। । (सत्यम्/ असत्यम्)

आ. दात्रम् इत्यत्र अधिकरणार्थे त्रन्प्रत्ययः प्रत्ययः। (सत्यम्/ असत्यम्)

३३. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 2

अ. अलोऽन्त्यात् पूर्व उपधा (१) अन्त्यात् अलः अव्यहितपूर्वः वर्णः उपधासंज्ञः भवति

आ. प्रादयः (२) प्रादिगणे पठिताः अद्रव्यवाचकाः शब्दाः निपातसंज्ञाः भवन्ति।

(३) क्रियया अन्विताार्थाः प्रादयः उपसर्गसंज्ञाः भवन्ति

३४. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 2

अ. गतिश्च (१) ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।

आ. यू स्त्र्याख्यौ नदी (२) प्रादिगणे पठिताः अद्रव्यवाचकाः शब्दाः निपातसंज्ञाः भवन्ति।

(३) क्रियया अन्विताार्थाः प्रादयः गतिसंज्ञाः भवन्ति।

३५. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 2

अ. हो ढः (१) झलि पदान्ते च उपदेशे दादेः धातोः हस्य घः।

आ. दादेर्धातोर्घः। (२) प्रादिगणे पठिताः अद्रव्यवाचकाः शब्दाः निपातसंज्ञाः भवन्ति।

(३) हस्य ढः स्यात् झलि पदान्ते च।

**{C} षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2x6=12**

३६. संहितासंज्ञाविधायकं सूत्रं किम्। सूत्रार्थः कः। 2

अथवा

इग्यणः सम्प्रसारणम् इति सूत्रार्थः कः? उदाहरण्म् अपि लिखत

३७. "विप्रतिषेधे परं कार्यम्" इति सूत्रस्यार्थः कः। 2

अथवा

"ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यत्र का परिभाषा प्रवर्तते।

३८. क्लीबस्य सर्वनामस्थाने परे नुमागमविधायकं किं सूत्रम्। तस्य अर्थः कः। 2

३९. चतुर् सु इति स्थिते रेफस्य विसर्गादेशः कुतः न इति सकारणं प्रतिपादयत। 2

४०. तुभ्यम् इत्यत्र युष्मदः तुभ्यादेशः केन। 2

अथवा

युष्मत् इत्यत्र अत् इत्यादेशः केन।

४१. हरिणा ईषत्करः प्रपञ्चः इत्यत्र ईषत्करः इत्यत्र कः प्रत्ययः। तस्य विधायकं किं सूत्रम्। 2

**{D} षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18**

४२. पदसंज्ञाविधायकम् उपसर्गसंज्ञाविधायकं वा सूत्रं व्याख्यात। 3

४३. “मोऽनुस्वारः” इति सूत्रं “नश्चापदान्तस्य” इति सूत्रं वा यथाग्रन्थं व्याख्यात। 3

४४. एकस्य ससूत्रं सिद्धिः कार्या - देवष्षडाननः। 3

४५. “भ्यसो भ्यम्” इति सूत्रम् “एकवचनस्य च” इति सूत्रं वा व्याख्यात। 3

४६. तुमुन्प्रत्ययविधायकानि सूत्राणि भावे सार्थं लिखत। 3

४७. “तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्” इति सूत्रं स्वभाषया व्याख्यात। 3

**{E} चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20**

४८. “तस्मिन्निति निर्दिष्टे पूर्वस्य” इति “अनेकाल्शित्सर्वस्य” इति वा परिभाषां सप्रवृत्त्युदाहरणं व्याख्यात। 5

४९. “वसुस्रंसुध्वंस्वनडुहां दः” इति सूत्रम् “अत्वसन्तस्य चाधातोः” इति सूत्रं वा सप्रसङ्गं व्याख्यात। 5

५०. “कालाध्वनोरत्यन्तसंयोगे” इति सूत्रम् सप्रसङ्गं व्याख्यात। 5

५१. उपपदविभक्तिं द्वितीयाम् आश्रित्य एकः निबन्धः लेख्यः। 5

--)(O)(--

**[A] प्रश्नसङ्ख्या १-२० बहुविकल्पप्रश्नाः सन्ति येषां कृते २० अङ्काः आवंटिताः भवन्ति।**

१. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

ब. (ग) कण्ठः **अथवा** (ग) विवारः श्वासः अघोषः च

२. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ख) ईषत्स्पृष्टः **अथवा**

ब. (ख) अविधीयमानः

३. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

**अ.** (ग) अण् उदित् **अथवा**

ब. (घ) सवर्णः।

४. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(ग) खरि च **अथवा**

(ख) आद् गुणः

५. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (क) गङ्गौघः **अथवा**

ब. (ख) प्राच्छ्ीति

६. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (क) हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं **अथवा**

ब. (क) औङ आपः

७. ७. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

**अ.** (घ) सम्बुद्धौ **अथवा**

ब. (क) आद्यन्तवदेकस्मिन्

८. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (घ) दश्च। अथवा

ब. (ख) पञ्चम्येकेवचनान्तम्

९. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (क) ङिति ह्रस्वश्च **अथवा** ब. (ख) इदुद्भ्याम्

१०. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ख) नोपधायाः **अथवा**

ब. (ग) भस्य टेर्लोपः

११. (क) दश्च 1

१२. (क) अकः सवर्णे दीर्घः 1

१३. (ख) हे गौरि 1

१४. (ख) संज्ञासूत्रम् 1

१५. (ख) षष्ठी 1

१६. (ग) विधिसूत्रम् 1

१७. (क) इक्श्तिपोः 1

१८. (ख) सत् 1

१९. (ख) च्छ्र इत्यस्य स्थाने श् इत्यादेशः 1

२०. (क) उभे अभ्यस्तम् इति 1

**{B} प्रश्नसङ्ख्या २१-३५ वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति, तदर्थं ३० अङ्काः आवंटिताः भवन्ति । 2x15=30**

**२१. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 1x2=2**

अ. सत्यम्
ब. सत्यम्
स. असत्यम्
द. सत्यम्

२२. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 1x2=2

अ. असत्यम्
ब. सत्यम्
स. असत्यम्
द. सत्यम्

२३. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 1x2=2

अ. सत्यम्
ब. सत्यम्

स. असत्यम्

द. सत्यम्

२४. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु : 1x2=2

अ. सत्यम्
ब. असत्यम्

स. सत्यम्

द. असत्यम्

अ. २५. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। अधोलिखितेषु कथनेषु केवलं कस्यापि द्वयोः उत्तरं ददातु :

अ. ङिच्च इति परिभाषासूत्रम्। (सत्यम्/असत्यम्)

ब. अङस्य इति अधिकारः द्वितीयाध्याये। (सत्यम्/असत्यम्)

स. संयोगात् पूर्ववर्ती ह्रस्वस्वरः गुरुसंज्ञः भवति। (सत्यम्/असत्यम्) 1x2=2

२६. अधोलिखितायाः सारण्याः मेलनं कुर्वन्तु। अधोलिखितेषु केवलं कस्यापि द्वयोः उत्तरं ददातु:1x2=2

अ. औङ आपः (२) उदाहरणम्- रमे

ब. सम्बुद्धौ च (१) उदाहरणम् - हे रमे।

स. **आङि चापः** **(३) उदाहरणम्-** रमया।

द. **याडापः** **(४) उदाहरणम्-** रमायै।

२७. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । अधोलिखितेषु केवलं कस्यापि द्वयोः उत्तरं ददातु :1x2=2

अ. अतोऽम् (२) ज्ञानम्

ब. यस्येति च (१) ज्ञाने

स. सर्वनामस्थाने चासम्बुद्धौ **(३)** ज्ञानानि।

द. इकोऽचि विभक्तौ **(४) उदाहरणम्-** वारिणी।

२८. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 1x2=2

अ. सत्यम्

ब. असत्यम्

२९. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 1x2=2

अ. सत्यम्

ब. असत्यम्

३०. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 1x2=2

अ. सत्यम्

ब. असत्यम्

३१. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 1x2=2

अ. असत्यम्

ब. सत्यम्

३२. निम्नलिखितवाक्यानि पठित्वा सम्यक् उत्तरं चिनोतु। 1x2=2

अ. सत्यम्

ब. असत्यम्

३३. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 1x2=2

अ. अलोऽन्त्यात् पूर्व उपधा (१) अन्त्यात् अलः अव्यहितपूर्वः वर्णः उपधासंज्ञः भवति

ब. प्रादयः (२) प्रादिगणे पठिताः अद्रव्यवाचकाः शब्दाः निपातसंज्ञाः भवन्ति।

३४. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 1x2=2

अ. गतिश्च **(३)** क्रियया अन्वितार्थाः प्रादयः गतिसंज्ञाः भवन्ति।

ब. यू स्त्र्याख्यौ नदी (१) ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।

३५. अधोलिखितायाः सारणीयाः मेलनं कुर्वन्तु । 1x2=2

अ. हो ढः **(३)** हस्य ढः स्यात् झलि पदान्ते च।

ब. दादेर्धातोर्घः। (१) झलि पदान्ते च उपदेशे दादेः धातोः हस्य घः।

**[B] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।** २x६=१२

३६. संहितासंज्ञाविधायकं सूत्रं "परः सन्निकर्षः संहिता" इति। सूत्रार्थः तावत् - 'वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।' इति। १+१=२

अथवा

यण्-वर्णस्य स्थाने आदेशरूपेण विधीयमानः इक्-वर्णः अनेन सूत्रेण सम्प्रसारणसंज्ञां प्राप्नोति। उदाहरणम्- विचितः

३७. "विप्रतिषेधे परं कार्यम्" इति सूत्रस्यार्थः 'तुल्यबलविरोधे सति परशास्त्रेण विहितं कार्यं स्यात्।' इति। "ह्रस्वो नपुंसके प्रातिपदिकस्य" इत्यत्र "अचश्च" इति परिभाषा प्रवर्तते। 1x2=2

अथवा

"ह्रस्वो नपुंसके प्रातिपदिकस्य" "एच इग्घ्रस्वादेशे" इति परिभाषा प्रवर्तते।

३८. क्लीबस्य सर्वनासस्थाने परे नुमागमविधायकं सूत्रं "नपुंसकस्य झलचः" इति। अत्र सूत्रार्थः तावत् - 'झलन्तस्य अजन्तस्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे।' इति। १+१=२

३९. चतुर् सु इत्यत्र रेफः न रुसम्बन्धी। अतः "रोः सुपि" इति सूत्रेण रोः रेफस्य एव विसर्गः इति नियमकरणादत्र रुसम्बन्ध्यभावान्न विसर्गादेशः। १+१=२

४०. तुभ्यम् इत्यत्र "तुभ्यमह्यौ ङयि" इति सूत्रेण मपर्यन्तस्य युष्मदः तुभ्यादेशः विधीयते। युष्मत् इत्यत्र "एकवचनस्य च" इति सूत्रेण अत् इत्यादेशः। १x२=२

अथवा

पञ्चम्या अत्। इति सूत्रेण तुभ्यम् इत्यत्र युष्मदः तुभ्यादेशः।

४१. हरिणा ईषत्करः प्रपञ्चः इत्यत्र ईषत्करः इत्यत्र खल्प्रत्ययः। तस्य विधायकं सूत्रम् "ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्" इति।१+१=२

**[C] षट् अनतिदीर्घोत्तरैः समाधत्त।** **३x६=१८**

४२. पदसंज्ञाविधायकं सूत्रं "सुप्तिङन्तं पदम्" इति -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः। अथवा

उपसर्गसंज्ञाविधायकम् "उपसर्गाः क्रियायोगे" इति सूत्रम् -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः।

४३. "मोऽनुस्वारः" इति सूत्रम् -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः। अथवा

"नश्चापदान्तस्य" इति सूत्रम् -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः।

४४. देवषडाननः इति रूपसिद्धिः वाक्यषट्केन।

४५. "भ्यसो भ्यम्" इति सूत्रम् -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः।

४६. तुमुन्प्रत्ययविधायकानि सूत्राणि

क) तुमुन्ण्वुलौ क्रियायां क्रियार्थाम् - अर्थः।

ख) कालसमयवेलासु तुमुन् - अर्थः।

ग) समानकर्तृकेषु तुमुन् - अर्थः।

घ) शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् - अर्थः।

ङ) पर्याप्तिवचनेष्वलमर्थेषु - अर्थः। अथवा

भावे घञ्प्रत्ययविधायकानि सूत्राणि -

क) भावे - अर्थः।

ख) अकर्तरि च कारके संज्ञायाम् - अर्थः।

४७. तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति सूत्रम् -

क) सूत्रव्याख्यानम्

ख) सूत्रार्थः

ग) उदाहरणसमन्वयः।

**[D] चत्वारः दीर्घोत्तरैः समाधेयाः।** **५x४=२०**

४८. "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः।

घ) उदाहरणम्। अथवा

"अनेकाल्शित्सर्वस्य" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः।

घ) उदाहरणम्।

४९. "वसुस्रंसुध्वंस्वनडुहां दः" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः। अथवा

सूत्रम् "अत्वसन्तस्य चाधातोः" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः।

घ) उदाहरणम्।

५०. "कालाध्वनोरत्यन्तसंयोगे" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः।

घ) उदाहरणम्। अथवा

"इत्थम्भूतलक्षणे" इति परिभाषा -

क) प्रसङ्गः।

ख) सूत्रव्याख्यानम्।

ग) सूत्रार्थः।

घ) उदाहरणम्।

५१. उपपदविभक्तिः द्वितीया -

क) उपपदविभक्तिलक्षणम्।

ख) अन्तरान्तरेण युक्ते - उदाहरणानि।

ग) कालाध्वनोरत्यन्तसंयोगे - उदाहरणानि।

घ) उभसर्वतसोः इति वार्तिकम् - उदाहरणानि।

ङ) अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि - उदाहरणानि।

--)(O)(--